**प्रियवादिन्** त्रि॰ प्रियं वदति वद–णिनि । प्रियवाक्यभाषके स्त्रियां ङीप् "भार्य्या चाप्रियवादिनी" चाणक्यः ।

**प्रियव्रत** त्रि॰ प्रियं व्रतमस्य । १व्रतप्रिये स्वायम्भुवमनोः २पुत्रभेदे पु॰ हरिवं॰ २अ॰ । [१।६।२३।

**प्रियश्रवस्** पु॰ प्रियं श्रवः श्रवणं यस्य । परमेश्वरे भाग॰

**प्रियसख** पु॰ कर्म॰ ६त॰ वा, अच्समा॰ । १हृद्ये सख्यौ २प्रियस्य सख्यौ च । स्त्रियां ङीप् । ३खदिरे शब्दच॰।

**प्रियसङ्गमन** त्रि॰ प्रिययोः सङ्गमनं यत्र । १प्रिययोर्मेलनस्थाने २कश्यपादित्योर्मेलनस्थाने देशभेदे पु॰ "यत्रादितिः कश्यपश्च महात्मानौ दृढ़व्रतौ । प्रियसङ्गमनं नाम तं देशं मुनयोऽवदन्" हरिवं॰ १२४अ॰ ।

**प्रियसत्य** न॰कर्म॰। १तथ्ये अथ च प्रिये सून्टतवाक्ये हेमच॰ प्रियं सत्यं यस्य । २सत्यप्रिये त्रि॰ ।

**प्रियसन्देश** पु॰ प्रियं सन्दिशति सम्+दिश–अण् उप॰स॰। १चम्पकवृक्षे भावे घञ् ६त॰ । २प्रियसंवादे शब्दच॰ ।

**प्रियसाल(क)** पु॰कर्म॰स्वार्थे क वा। असनवृक्षे (पियाशाल) राजनि॰ ।

**प्रियादि** विशेषणवाचिनि समानाधिकरणस्त्रीलिङ्गशब्दे परे ब॰व्री॰ पूर्वस्य पुंवद्भावे पर्युदस्ते शब्दगणे स च गणः पा॰ग॰सू॰ उक्तो यथा "प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामना तनया" । सुन्दरी प्रिया यस्य । सुन्दरीप्रिय इत्यादि ।

**प्रियाम्बु** पु॰ प्रियं पितॄणां प्रियमम्बु मूले सिक्तं जलमस्य । १आम्रवृक्षे राजनि॰ । २जलप्रिये त्रि॰ ।

**प्रियार्ह** त्रि॰प्रियमर्हति अर्ह–अण् उप॰स॰। १प्रियवाक्यादियोग्ये २विष्णौ पु॰"अभिप्रायः प्रियार्होऽर्हः"विष्णुस॰।

**प्रियाल** पु॰ प्रियाय अलति पर्य्याप्नोति अल–अच् । प्रियसाले (पियाशाल) २द्राक्षायां स्त्री राजनि॰ भावप्र॰ पियाल इत्येव पाठः "पियालस्तु खरस्कन्धश्चारो बहुलवल्कलः । राजादनस्तापसेष्टः सन्नकद्रुर्धनुष्पटः । चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् । पियालमज्जा मधुरो वृष्यः पित्तानिलापहः । हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः" भावप्र॰ ।

**प्रियोदित** न॰ कर्म॰ । चाटुवाक्ये शब्दरत्ना॰ ।

**प्री** तर्पणे भ्वा॰उभ॰सक॰अनिट् । प्रयति ते अप्रैषीत् अप्रैष्ट पिप्राय पिप्रिये ।

**प्री** प्रीतौ कान्तौ (इच्छायाम्) सक॰ दिवा॰ आत्म॰ अनिट् । प्रीयते अप्रैष्ट पिप्रिये ।

**प्री** तर्पणे सक॰ कान्तौ तृप्तौ अक॰ क्र्या॰उभ॰अनिट् । प्रीणाति प्रीणीते अप्रैषीत् अप्रैष्ट पिप्राय पिप्रिये । प्रीत. । णिच् नुक् । प्रीणयति ते । [अत्रापि नुक् प्रीणयतीत्येके ।

**प्री** तर्पणे सक॰चु॰उभ॰अनिट् । प्राययति ते अपिप्रयत्-त ।

**प्रीण** त्रि॰ प्री–णिच् कर्त्तरि अच् । १प्रीणनकारके करणे अच् । २नर्मणि मेदि॰ । पुराणार्थप्रशब्दात् भवार्थे न । २पुराणे त्रि॰ त्रिका॰ ।

**प्रीणन** न॰ प्री–णिच्–नुक्–ल्युट् । तर्पणे अमरः ।

**प्रीणस** पु॰ प्रीणि–बा॰ असच् । गण्डके राजनि॰ ।

**प्रीत** त्रि॰ प्री–कर्त्तरि क्त । हृष्टे अमरः ।

**प्रीति** स्त्री प्री–भावे क्तिच् । १हर्षे २आमोदे ३तृप्तौ च । विष्कुम्भादियोगेषु ४द्वितीययोगे । ५कामस्य पत्नीभेदे रत्याः सपत्न्यां च "वेश्याऽनङ्गवती नाम विभूतिद्वादशीव्रतम् । समाप्य माघमासस्य द्वादश्यां लवणाचलम् । निवेदयन्ती गुरवे शय्याञ्चोपस्करान्विताम् । अलङ्कृत्य हृषीकेशं सौवर्णामरपादपम् । स चानङ्गवती वेश्या कामदेवस्य साम्प्रतम् । पत्नी, सपत्नी संजाता रत्याः प्रीतिरिति स्मृता" मात्स्ये ८२अ॰ ।

**प्रीतिजुष** त्रि॰ प्रीतिं जुषते जुष–क । १प्रीतिभाजि २अनिरुद्धपत्न्यामुषायां स्त्री शब्दरत्ना॰ "विश्वकेतुः प्रीतिजुषासुतः" त्रिका॰ तत्पुत्रोक्तौ । [प्रद्युम्नमिनि पु॰ हेमच॰।

**प्रीतिद** त्रि॰ प्रीतिं ददाति दा–क । प्रीतिदायके (भाँड़)

**प्रीतिदत्त** त्रि॰३त॰। १प्रीत्या दत्ते २स्त्रीधनभेदे न॰ यथाह मिता॰ कात्यायनः "प्रीत्या दत्तं तु यत्किञ्चित् श्वश्र्वा वा श्वशुरेण वा । पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते" । भर्तृप्रीतदत्तस्थावरे तु विशेषः दाय॰ उक्तो यथा "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृते तत् । सा यथा काममश्नीयात् दद्याद्वा स्थावरादृते" ।

**प्रीतिदाय** पु॰ प्रीत्या दीयते दा–कर्मणि घञ् । प्रीत्या दत्ते "श्वशुरात् प्रीतिदायं तु प्राप्य सा प्रीतमानसा" भा॰आनु॰ ८६ अ॰ ।

**प्रीतिभोज्य** न॰ प्रीत्या भोज्यम् । प्रीत्यैव भोज्ये अन्नादौ "अन्नानि प्रीतिभोज्यानि चापद्भोज्यानि वा पुनः । न च संप्रीयसे राजन् ! न चैवापद्गतावयम्" भा॰उ॰ ९० अ॰। "संप्रीतिभोज्यान्यन्नानि" इति मुद्रितपुस्तके पाठ. ।

**प्रीतिवर्द्धन** त्रि॰ प्रीतिं वर्द्धयति वृध–णिच्–ल्यु । १सन्तोष-